योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०९१

चूडालोवाच ।

इदानीं राजशार्दूल वस्तुसंप्रतिपत्तये ।

शृणु विन्ध्येभवृत्तान्तविवृतिं स्मयकारिणीम् ।। १

योऽसौ विन्ध्यवने हस्ती सोऽस्मिन्भूमितले भवान् ।

यौ वैराग्यविवेकौ तौ द्वौ तस्य दशनौ सितौ ।। २

यश्चासौ वारणाक्रान्तितत्परो हस्तिपः स्थितः ।

तदज्ञानं तवाक्रान्तितत्परं तव दुःखदम् ।। ३

अतिशक्तोऽप्यशक्तेन दुःखाद्दुःखं भयाद्भयम् ।

हस्ती हस्तिपकेनेव राजन्मौर्ख्येण नीयसे ।। ४

यल्लोहवज्रसारेण वारणः परियन्त्रितः ।

तदाशापाशजालेन भवानापदमावृतः ।। ५

आशा हि लोहरज्जुभ्यो विषमा विपुला दृढा ।

कालेन क्षीयते लोहं तृष्णा तु परिवर्धते ।। ६

यद्द्वन्द्वं प्रेक्षते वैरी गजमारादलक्षितः ।

प्रेक्षते त्वां तदज्ञानं क्रीडार्थं बद्धमेककम् ।। ७

यद्बभञ्ज गजः शत्रोः शृङ्खलाजालबन्धनम् ।

तत्तत्याज भवान्भोगभूमिं राज्यमकण्टकम् ।। ८

कदाचित्सुकरं शस्त्रशृङ्खलाबन्धभेदनम् ।

न त्वस्य मनसः साधो भोगाशाविनिवारणम् ।। ९

यदिभे पाटयत्युच्चैर्बन्धं हस्तिपकोऽपतत् ।

त्वयि त्यजति तद्राज्यमज्ञानं पतितं कृतम् ।। १०

यदा विरक्तः पुरुषो भोगाशां त्यक्तुमिच्छति ।

तदा प्रकम्पतेऽज्ञानं छेद्ये वृक्षे पिशाचवत् ।। ११

यदा विवेकी पुरुषो भोगान्संत्यज्य तिष्ठति ।

तदा पलायतेऽज्ञानं छिन्ने वृक्षे पिशाचवत् ।। १२

भोगौघे नूनमुन्मुक्ते पतत्यज्ञानसंस्थितिः ।

पादपे क्रकचच्छिन्ने कुलायस्तद्गतो यथा ।। १३

यदा वनं प्रयातस्त्वं तदाऽज्ञानं क्षतं त्वया ।

पतितं सन्न निहतं मनस्त्यागमहासिना ।। १४

तेन भूयः समुत्थाय स्मृत्वा परिभवं कृतम् ।

तपःप्रपञ्चखातेऽस्मिन्गहने त्वं नियोजितः ।। १५

तदैवाघातयिष्यस्त्वं यद्यज्ञानं तथागतम् ।

राज्यत्यागविधौ तत्त्वां नाहनिष्यत्क्षयं गतम् ।। १६

यत्खातवलयस्तेन वैरिणा हस्तिनः कृतः ।

तत्तपोदुःखमखिलमज्ञानेन तवार्पितम् ।। १७

या तस्य राजराजश्रीर्गजारेर्नृपसत्तम ।

सा त्ववज्ञाननृपतेश्चिन्ताभ्यन्तरचारिणी ।। १८

त्वं गजेन्द्रस्त्वयं साधो दीर्घे वनेऽगजोऽपि सन् ।

अज्ञानवैरिणा तेन निक्षिप्तस्तरसामितः ।। १९

यत्खातवलयो बाललताभिरवगुण्ठितः ।

आवृतं तत्तपोदुःखमीषत्सज्जनवृत्तिमिः ।। २०

इत्यद्यापि तपःखाते दुःखे ह्यस्मिन्सुदारुणे ।

स्थितोऽसि पातालतले नृप बद्धो यथा बलिः ।। २१

गजस्त्वमाशा निगडानि वैरी

मोहो निखातः पुनरुग्रबन्धः ।

महीतलं विन्ध्य उदन्त इत्थं

त्वदीय उक्तः कुरु यत्करोषि ।। २२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी० दे० मो० निर्वाणप्र० पू० चू० हस्तिकाख्यानतात्पर्यविवरणं

नामैकनवतितमः सर्गः ।।९ १ ।।